यहाँ से काटिए

नामांक Roll No.

Sl.No. :

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 22

No. of Printed Pages – 07

**VU–87–Sahit. Shas.**

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

# वरिष्ठ उपाध्याय परीक्षा, 2024

# VARISHTHA UPADHYAYA EXAMINATION, 2024

## साहित्य – शास्त्रम्

**समय** : 3 **घण्टे** 15 **मिनिट**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।

2) **सर्वे** प्रश्नाः समाधेयाः।

3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेखनीयानि।

यहाँ से काटिए

## खण्ड–अ

**1)** वस्तुनिष्ठप्रश्नाः **[15×1=15]**

i) प्रस्तुताऽप्रस्तुतानां च तुल्यत्वे भवति। **[1]**

अ) तुल्ययोगिता ब) दीपकालङ्कारः

स) दृष्टान्तालङ्कारः द) विभावना

ii) सदृशयोः वाक्यार्थयोः ऐक्यारोपः भवति। **[1]**

अ) विशेषोक्तिः ब) प्रतिवस्तूपमा

स) निदर्शना द) पर्यायोक्तिः

iii) ''शैला इवोन्नताः सन्तः किन्तु प्रकृति कोमलाः'' इत्यत्र अलङ्कारोऽस्ति– **[1]**

अ) अर्थान्तरन्यासः ब) रूपकालङ्कारः

स) दृष्टान्तालङ्कारः द) व्यतिरेकालङ्कारः

iv) विभावः (कारणं) कतिविधः भवति? **[1]**

अ) द्विविधः ब) चतुर्विधः

स) त्रिविधः द) पञ्चविधः

v) उत्साहाख्यस्थायिभावः वर्तते। **[1]**

अ) रौद्ररसस्य ब) हासरसस्य

स) वीररसस्य द) शान्तरसस्य

vi) सर्वथा समास रहिता रीतिः का भवति? **[1]**

अ) पाञ्चाली ब) गौडी

स) लाटी द) वैदर्भी

vii) का वृत्तिः नास्ति? **[1]**

अ) परुषा ब) ललिता

स) गौडी द) भद्रा

viii) चन्द्रालोके गुणी भूतव्यङ्ग्यं कति विधं स्वीकृतम्? [1]

अ) अष्टविधम् ब) सप्तविधम्

स) दशविधम् द) पञ्चविधम्

ix) रसभावतदाभासादयोऽन्तर्निहिता भवन्ति – [1]

अ) अर्थान्तरसङ्क्रमितवाच्ये ब) असंलक्ष्यक्रमव्यङ्ग्ये

स) संलक्ष्यक्रमव्यङ्ग्ये द) अत्यन्ततिरस्कृतवाच्ये

x) ''अमीलनम्'' इत्यस्य कोऽर्थः? [1]

अ) माणवकः ब) शुक्लः

स) सङ्कोचः द) उपादानम्

xi) चन्द्रालोकानुसारम् अभिधा वर्तते – [1]

अ) पञ्चविधा ब) षड्विधा

स) चतुर्विधा द) त्रिविधा

xii) यक्षः कीदृशः नायकः? [1]

अ) धीरललितः ब) धीरप्रशान्तः

स) धीरोदात्तः द) धीरोद्धतः

xiii) यक्षः शापावधिं यापयति – [1]

अ) अलकापुर्याम् ब) रामगिरौ

स) उज्जयिन्याम् द) आम्रकूटगिरौ

xiv) जललवमुचाः मार्गं सूचयिष्यन्ति – [1]

अ) मयूराः ब) मुकुलाः

स) सारङ्गाः द) देवाङ्गनाः

xv) कैकेयी रामस्य कृते किम् इच्छति? [1]

अ) राज्याभिषेकम् ब) राजभवने शयनम्

स) मातुलगृहगमनम् द) चतुर्दशवर्षाणां वनगमनम्

2) रिक्तस्थानानि पूरयत – [7×1=7]

i) .................. विनापि स्यात्कारणं कार्यजन्म चेत्। [1]

ii) स्यान्मल्ल ................ सङ्ग्रामोद्दामहुङ्कृतिः। [1]

iii) तथा वाच्यस्य ............. नौरर्थो वारिधेर्यथा। [1]

iv) अन्यथा तु ................... व्यङ्ग्यमापतितं द्विधा। [1]

v) कामाऽऽर्ता हि प्रकृतिकृपणाश्च ......................। [1]

vi) महाराजदशरथस्य .................. राज्ञ्यः आसन्। [1]

vii) अनुचरति शशाङ्कं ...................... तारा। [1]

3) अतिलघूत्तरात्मकाः प्रश्नाः [10×1=10]

i) श्लेषकाकुभ्यां वाच्यार्थान्तर–कल्पनम् कस्मिन् अलङ्कारे भवति? [1]

ii) श्रृङ्गाररसः कतिविधः? नामोल्लेखं कुरुत। [1]

iii) स्वाङ्कुरितव्यङ्ग्यं कतिविधम्? [1]

iv) अविवक्षितवाच्यध्वनेः भेदयोः नाम्नी लेख्ये। [1]

v) मुख्यार्थस्य अविवक्षायां सम्बद्धं अर्थं का वृत्तिः बोधयति? [1]

vi) इक्ष्वाकुवंशे दिवङ्गतानां नृपाणां प्रतिमाः कुत्र स्थापिताः आसन्? [1]

vii) रामः अरण्ये कस्य श्राद्धकर्म कर्तु मिच्छति? [1]

viii) प्रतिमानाटके कति अङ्काः सन्ति? [1]

ix) ''किं रोषणाय रुचिरं त्रिषु पातकेषु'' इति कस्य कथनं वर्तते? [1]

x) विन्ध्यपादे का विशीर्णा वर्तते? [1]

## खण्ड–ब

लघूत्तरात्मकाः प्रश्नाः [12×2=24]

4) ''हनूमानब्धिमतरद्दुष्करं किं महात्मनाम्'' इत्यत्र कोऽलंकारः? तल्लक्षणं लेखनीयम्। [1+1=2]

5) ''दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिन्दुना'' इत्यत्र अलङ्कारं प्रदर्श्य लक्षणमपि लिखत। [1+1=2]

6) रौद्र रसस्य स्वरूपं लिखत। [2]

7) अगूढगुणीभूतव्यङ्ग्यस्य स्वरूपं लिखत। [2]

8) अभिधावृत्तिः कतिविधः? नामानि लिखत। [1+1=2]

9) ''रिक्तः सर्वो भवति हि लघु पूर्णता गौरवाय'' सूक्तेः भावार्थो लेख्यः। [2]

10) मेघदूतस्य नामकरणे किं वैशिष्ट्यम्? लिखत। [2]

11) आम्रकूटपर्वतस्य महत्त्वं प्रतिपादनीयम्। [2]

12) सलिलनिधयः कथं तोयमात्रावशेषाः? [2]

13) ''हस्तस्पर्शे हि मातृणामजलस्य जलाञ्जलिः'' इति सूक्तेः भावार्थो लेखनीयः। [2]

14) ''हा हा गताः किल वनं वत मे तनूजाः'' इत्यत्र छन्दः परिचीय तल्लक्षणमपि लिखत। [2]

15) ''युवतिरहितं लोकं कर्त्तुं यतश्छलिता वयम्'' इत्यत्र गणचिह्नानि योजयित्वा छन्दसः नाम लेखनीयम्। [2]

## खण्ड–स

दीर्घोत्तरीयप्रश्ना :–

**16)** निम्नलिखितयोः कारिकयोः एकस्याः कारिकायाः व्याख्या करणीया। **[3]**

क) निर्वेदस्थायिकः शान्तः सत्सङ्गादि विभावभूः।

क्षमादिकानुभावोऽयं स्तम्भादिव्यभिचारिकः।।

ख) रत्याख्यस्थायिभावात्मा वल्लभादिविभावितः।

आलस्येर्ष्याजुगुप्साभ्यो विना सञ्चारिभिर्युतः।।

**17)** निम्नलिखितयोः कारिकयोः एकस्याः कारिकायाः व्याख्या करणीया। **[3]**

क) अस्फुटं चार्थनिष्ठत्वात् तटस्थत्वादपि द्विधा।

लक्ष्यलक्षकनिष्ठत्वादर्थ–संस्थमपि द्विधा।

ख) आभिमुख्यात् सन्निधाना तथाऽऽकारप्रतीतितः।

कार्यकारणभावात्सा वाच्यवाचकभावतः।।

**18)** अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसंङ्गभावार्थो लेखनीयः। **[1+2=3]**

क) आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा,

सिद्धद्वन्द्वैर्जलकणभया द्वीणिभिर्मुक्तमार्गः।

व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्,

स्रोतोमूर्त्या भुविपरिणतां रन्तिदेवस्य कीर्तिः।।

ख) तां चावश्यं दिवसगणनात्परामेकपत्नी,

मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।

आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां,

सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि।।

**19)** महाकविभासप्रणीतस्य प्रतिमानाटकस्य प्रथमाङ्कस्य कथासारः संस्कृतेन स्वशब्दैः लेखनीयः। **[3]**

अथवा

भरतस्य चरित्रचित्रणं करणीयम्।

## खण्ड–द

**20)** निम्नलिखितयोः कारिकयोः एकस्याः कारिकायाः व्याख्या करणीया। **[4]**

क) त्रिधा शब्दार्थतद्युग्मशक्तिजन्मा स्फुटक्रमात्।
रसभावतदाभासप्रमुखस्त्वस्फुटक्रमात्।।

अथवा

ख) कश्चित् साधारणः कश्चिदामन्त्र्य प्रतिबोधितः।
कश्चित्तटस्थः कश्चिच्च बोधितप्रतिबोधितः।।

**21)** अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसंङ्ग–व्याख्या लेखनीया। **[1+3=4]**

क) वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां,
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि।।

ख) रत्नछायाव्यतिकर इव प्रेक्ष्य मेतत्पुरस्ता,
द्वल्मीकाग्रात् प्रभवति धतुः खण्डमाखण्डलस्य।
येनं श्यामं वपुरतितरां कान्तिमापत्स्यते ते,
बर्हेणैव स्फुरितरुचिना गोपवेशस्य विष्णोः।।

**22)** अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसंङ्ग व्याख्या विधेया। **[1+3=4]**

क) छत्रं सव्यजनं सनन्दिपटहं भद्रासनं कल्पितं,
न्यस्ता हेममयाः सदर्भकुसुमास्तीर्थाम्बुपूर्णाः घटाः
युक्तः पुष्यरथश्च मन्त्रिसहिताः पौराः समभ्यागताः
सर्वस्यास्य हि मङ्गलं स भगवान् वेद्यां वशिष्ठः स्थितः।।

ख) क्व ते ज्येष्ठो रामः प्रियसुत! सुतः सा क्व दुहिता,
विदेहानां भर्तुर्निरतिशयभक्तिर्गुरुजने।
क्व वा सौमित्रिर्मां हतपितृकमासन्नमरणं,
किमप्याहुः किं ते सकलजन शोकार्णवकरम्।।

DO NOT WRITE ANYTHING HERE